

# Lord Malola Narasimhan



Sri Adivan Sathakopa Yatheentra Mahadesikan
श्रीमदादिवण्शटकोप यतीन्द्र महादेशिकन्



Hamsa Mudra

Website : www.ahobilamutt.org
Contact E-mail: feedbacksriahobilamath@gmail.com

श्रीः





यस्याभवद्भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्यतूर्णम् ।
स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये ।।

श्रीमते श्रीलक्ष्मीनृसिंह परब्रह्मणे नमः ।

| | | |
|---|---|---|
| अस्मद् गुरुभ्यो नमः | अस्मद् परमगुरुभ्यो नमः | अस्मद् सर्वगुरुभ्यो नमः |
| श्रीमदादिवण्शठकोपयतीन्द्र महादेशिकाय नमः | | श्रीमते वेदान्तगुरवे नमः |
| श्रीमते रामानुजाय नमः | श्रीपराङ्कुशदासाय नमः | श्रीमद् यामुनमुनये नमः |
| श्री राममिश्राय नमः | श्रीपुण्डरीकाक्षाय नमः | श्रीमन्नाथमुनये नमः |
| श्रीमते शठकोपाय नमः | श्रीमते विष्वक्सेनाय नमः | श्रियै नमः श्रीधराय नमः |

अस्मद्देशिकम् अस्मदीय परमाचार्यान् अशेषान् गुरून्
श्रीमल्लक्ष्मणयोगि पुङ्गव महापूर्णो मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ।।

विष्णुश्री पृतनापतीन् शठरिपु श्रीनाथ पद्मेक्षणान्
रामं यामुनपूर्णमिश्रयतिराट् गोविन्दभट्टारकान् ।
वेदान्त्याख्यमुनिं कलिप्रमथनं श्रीकृष्णपादाभिधं
श्रीरङ्गेश्वर केशवार्य कमलावासान् भजे केशवम् ।।

केशवार्य कृपापात्रं धीशमादिगुणार्णवम् ।
श्री शठारि यतीशानं देशिकेन्द्रमहं भजे ।।

प्रपद्ये निरवद्यानां निषद्यां गुणसंपदाम् ।
शरणं भवभीतानां शठकोप मुनीश्वरम् ।।

श्रीमदादिवण्शठकोप यतीन्द्र महादेशिकाय नमः ।।



श्रीरङ्गनाथशठकोपयतीन्द्रदृष्टं
लक्ष्मीनृसिंहशठजित्करुणैकपात्रम् ।
श्रीरङ्गवीररघुराट्शठकोपहृद्यं
वेदान्तदेशिकयतीन्द्रमहं प्रपद्ये ।।

श्रीमते श्रीवण्शठकोप श्री वेदान्तदेशिक
यतीन्द्र महादेशिकाय नमः ।।



श्रीमद्रङ्गशठारि संयमिवराल्लब्धागमान्तद्वयम्
श्रीमद्वीररघूद्वहाद्यशठजित्पादारविन्दाश्रयम् ।
श्रीमद्वेदवतंसदेशिकयतेः कारुण्यवीक्षास्पदम्
सेवे रङ्गधुरीणशासनवशं नारायणं योगिनम् ।।

श्रीमते श्रीलक्ष्मीनृसिंह दिव्यपादुकासेवक
श्रीवण्शठकोप श्री नारायणयतीन्द्र
महादेशिकाय नमः ।।



वेदान्तदेशिकयतीन्द्र कटाक्षलब्ध
त्रय्यन्त सारं अनवद्यगुणं बुधाग्रयम् ।
नारायणाद्य यतिधुर्य कृपाभिषिक्तम्
श्रीरङ्गनाध यतिशेखरम् आश्रयामः ।।

श्रीमते श्रीवण्शठकोप श्रीरङ्गनाथयतीन्द्र
महादेशिकाय नमः ।।

योनित्यमच्युतपदाम्बुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणायमेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्यचरणौ शरणं प्रपद्ये ।।

श्रीरामानुय दासोस्मि

एन्नुयिर् तन्दळित्तवरै शरणं पुक्कु
यानडैवे अवर् गुरुक्कळ् निरै वणंगि
पिन्नरुळाल् पेरुम्बूदूर् वन्द वळ्ळल्
पेरिय नंबि आळवंदार् मणक्काल् नंबि
नन्नेरियै अवर्कुरैत्त अय्यक्कोंडार्
नाथमुनि शठकोपन् शेनैनाथन्
इन्नमुद त्तिरुमगळ् एन्रिवरै मुन्निट्ट
एंबेरुमान् तिरुवडिगळ् अडैगिन्रेने

आल्वार् तिरुवडिगळे शरणं

१. मूलमन्त्रम् (अथवा) अष्टाक्षरम्

ओं नमो नारायणाय ।

२. शरणागति (द्वय) मन्त्रम्-

श्रीमन्नारायणचरणौ शरणं प्रपद्ये ।
श्रीमते नारायणाय नमः ।।

३. चरमश्लोकः

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।

४. श्री मन्त्रम्-

श्रीं श्रियै नमः

पुरुषों तीन् काल अष्टाक्षर मंत्र को गायत्री मन्त्र जब करने के बाद गायत्री मन्त्र समसंख्य करना है । उपस्थान् करने के बाद इन चारो पन्त्रों को जप करना चाहिए ।

औरत् लोगों इन चारों मन्त्रों को सिर्फ सुभे जप करना हे । **मूलमंत्र को अम नमो नारायणाय** जप करना चाहिए ।